# २३. पञ्चम्यर्थे तः

## पञ्चम्यर्थे तः इति प्रयोगः सरलः। तः इति अव्ययपदम्। अतः सर्वेषु लिङ्गेषु तस्य रूपं समानम् ।

| **पञ्चमीविभक्तिः** | | **तः** |
|---|---|---|
| विद्यालयात् | = | **विद्यालयतः** |
| नद्याः | = | **नदीतः** |
| ग्रन्थात् | = | **ग्रन्थतः** |
| गृहात् | = | **गृहतः** |
| शालायाः | = | **शालातः** |
| बालकस्य | = | **बालकतः** |

### पञ्चमीविभक्तेः तः इत्यनयोः अर्थभेदः नास्ति।

| **अवधेयम्** | |
|---|---|
| **अशुद्धम्** | **शुद्धम्** |
| अत्रतः | अतः |
| तत्रतः | ततः |
| कुत्रतः | कुतः |
| उपरितः | उपरिष्टात् |

## कोष्ठके दत्तानि वाक्यानि पठतु अवगच्छतु च ।

| | | |
|---|---|---|
| गङ्गा हिमालयतः प्रवहति। | | पत्राणि वृक्षतः पतन्ति। |
| फलं वृक्षतः पतति। | | माता शाटिका वस्त्रालयतः क्रीतवति। |
| मोहनः विद्यालयतः आगच्छति। | | औषधयः पृथिवीतः उद्भवन्ति। |
| शब्दः दूरवाणीतः भवति। | | युवकाः क्रीडाङ्गणतः आगच्छन्ति। |
| लोकयानं चेन्नैनगरतः गच्छति। | | कपयः वृक्षतः अवरोहन्ति । |
| श्वासः नासिकातः आगच्छति। | | वयम् आचार्यतः ज्ञानं सम्पादयामः। |
| कमलं सरोवरतः जायते। | | कृषकाः नगरतः ग्रामं गच्छन्ति। |
| हस्ततः कङ्कणं पतति। | | नार्याः नदीतः जलम् आनयन्ति। |
| शीतलता कौमुदीतः प्रवहति। | | मधुरं पिपिलिकातः रक्षतु। |
| पुरुषः कार्यालयतः गृहम् आगच्छति। | | सः वित्तकोशतः धनम् आनयति। |


## अभ्यासः - उचितपदानि चित्वा कस्मात् किम् आगतः इति लिखतु

| | |
|---|---|
| ग्रन्थालयतः | औष्ण्यम् |
| दूरवाणीतः | गन्धः |
| शीतपेटिकातः | वृष्टिः |
| आतपतः | पुस्तकम् |
| बीजतः | चूर्णम् |
| तण्डुलतः | जलम् |
| रुग्णालयतः | क्षीरम् |
| गन्धवर्तिकातः | शब्दः |
| क्षीरकेन्द्रतः | औषधम् |
| सरोवरतः | शैत्यम् |
| वित्तकोशतः | अङ्कुरः |
| मेघतः | धनम् |

1. ---- ---- ----
2. ---- ---- ----

3. ---- ---- ----
4. ---- ---- ----
5. ---- ---- ----
6. ---- ---- ----
7. ---- ---- ----
8. ---- ---- ----
9. ---- ---- ----
10. ---- ---- ----
11. ---- ---- ----

## अभ्यासः - कस्मात् किम् आगतम् इति लिखतु




1. ---- ---- ----
2. ---- ---- ----
3. ---- ---- ----
4. ---- ---- ----

## पञ्चम्यर्थे तः इत्यस्य प्रयोगः

| |
|---|
| **क्षीरकेन्द्रम्, हिमालयः, वाराणासी, क्रीडाङ्गणम्, नदी, नगरम्, छुरिका, आपणम्, पाकशाला, कार्यालयम् ग्रामः, गोशाला, मुखं, यानम्, पाञ्चालिका, वृक्षः, ग्रन्थालयः, शाखा, बाष्पस्थाली।** |

## उपरिष्टात् कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानं पूरयतु ।

| | | |
|---|---|---|
| १ | **कुतः धूमः आगच्छति** | **पाकशालातः धूमः आगच्छति।** |

| | | |
|---|---|---|
| २ | भवती  कुतः क्षीरं क्रीणाति? | |
| ३ | बाष्पः कुतः आगच्छति? | |
| ४ | यात्रिका कुतः पतति? | |
| ५ | भवान्  कुतः पुस्तकानि स्वीकरोति? | |
| ६ | गोपालकः कुतः गां  नयति? | |
| ७ | फलरसः कुतः श्रवति? | |
| ८ | खजूरः कुतः क्रीणाति? | |
| ९ | कृषकः कुतः आगच्छति? | |
| १० | कुतः फलानि पतति? | |
| ११ | बालकः कुतः आगच्छति? | |
| १२ | ग्रामीणः कुतः जलम् आनयति? | |
| १३ | पुष्पं कुतः पतितम्? | |
| १४ | शब्दः कुतः आगच्छति? | |
| १५ | रेल्यानं  कुतः आगच्छति? | |
| ***उत्तराणि अधोभागे दत्तानि।** | | |

**आवरणान्तर्गतेन शब्देन वाक्यानि पूरयत।**

उदाहरणम्

**१.  जलं द्रोणीतः (द्रोणी) उद्गच्छति।**

२. तैलं---------(कूपी)  स्रवति।

३. युवकाः----- (यानम्) कूर्दन्ति।

४. नदी ------   (गिरिः) प्रवहति।

५.  दध्यन्नं ----- (मार्जारः) रक्षतु।

६.  नवनीतं -----(दधि)  प्राप्नोति।

७.  वयं -----(समुद्रतीरम्) शङ्खम् आनयामः ।

८. सर्वकारः-----(भूकम्पः) जनान् रक्षति ।

९. मणिः --------(माला) पतति ।

१०. बालः -------(शाला) आगच्छति।

११. गायकः -----(सभा) बहिरागच्छति ।

१२. सा ---------(विदशराज्यम्) अत्र आगता ।

१३. अन्नं-------- (स्थालिका) पतति ।

१४. शब्दः ------(घण्टा) भवति ।

१५. नूपुरं -------(पादः) पतति।

१६. धूमः ------(यानम्) आगच्छति।

१७. कृषकः -----(अजाः) कृषिभूमिं रक्षति ।

१८.वृष्टिः ------(मेघः) पतति।

१९.दन्तः -------(मुखं) पतति

२०.सा ---------(कपाटिका) पुस्तकानि स्वीकरोति।

२१.ध्वनिः ------(आकाशवाणी) भवति।

२२.बालकः ---- (वर्गः) बहिः तिष्ठति।

२३.शिशुः -----(शय्या) न उत्तिष्ठति।

२४.----- (वातनियन्त्रकः) शैत्यम् आगच्छति।

२५.सः ---- (विदेशः) आगन्तुम् इच्छति।

२६. अम्बा---(गृहम्) भोजनम् आनयति।

२७. माला-----(नीलगिरी) प्रयाणं करोति।

२८. मोनिषा पुस्तकानि ----(विदेशः) आनयति।

२९. मातुलः वस्त्राणि ----(आपणः) क्रीतवान्।

३०. निर्झरः -----(पर्वतः) प्रवहति।

***उत्तराणि**- १. पाकशालातः, २. क्षीरकेन्द्रतः, ३. बाष्पस्थालीतः, ४. यानतः, ५. ग्रन्धालयतः, ६. गोशालातः,

७. छुरिकातः ८.आपणतः, ९. नगरतः, १०. वृक्षतः, ११. क्रीडाङ्गणतः, १२. नदीतः, १३.शाखातः, १४. मुखतः, १५. वाराणसीतः।